अथ गुह्यां न्यसेत्। शिवो भवेत्। शक्तिरूपो भवेत्। विद्याराज्ञीन्यासमेवं चरेत्। न जपो न पूजा न साधनं न कालनियमो न दिवा न रात्रिः। सर्वकालं न्यसेत्। शक्तियुक्तो भवेत्। यथाधिकारवान् न्यसेत्। पूर्णदीक्षां लभेत्। षोढारूपो भवेत्। चिन्तामणिर्भवेत्। क्रीं मातृस्थाने न्यसेत्। परात् परतरो भवेत्। शिवो भवेदित्येकः। अथ ताराद्वयपुटितां मातृकां मातृकापुटितां तां मातृकास्थाने न्यसेत। परातीतारूपो भवेदिति द्वितीयः। अथ शक्तिकाद्वयपुटितां मातृकां मातृकापुटितां तां न्यसेत्। तुर्यारूपो भवेत्। तृतीयकलारूपो भवेत्। कालसंकलनात् काली। सहेलं सर्व स्मरणाद्वरदानेषु चतुरा। तेनेयं दक्षिणा। संबोधनद्वयपुटितां मातृकापुटितं नामद्वयं लिपिस्थाने न्यसेत्। तुर्यात् परारूपो भवेत्। कलारूपो भवेत्। लोकपालसंवादिनी चतुर्थी। अथ पञ्चमीं कलां पञ्चमीकलारूपो भवेत्। सुभगात्रयं कूर्चवह्निललनां वह्नेस्त्रिको

लांलनाच्छ्रीकण्ठरूपस्तुर्या परातीता । एतत्पुटितमातृकापुटितमेतन्मन्त्रं मातृकास्थाने न्यसेदिति पञ्चमी । शिवत्वं गच्छति । स सर्वरूपो भवेत् । अथ षष्ठीं कलां न्यसेत् । पूर्णो विद्याराज्ञीं लिपिस्थाने न्यसेद्व्यापयेत् । स शिवो भवेत् । स सर्वज्ञत्वं गच्छति । स कविर्भवेत् । स सन्न्यासी भवेत् । देवो ह वै भवेत् । विश्वरूपो भवेत् । अयुतं न्यसेत् । ऋषिच्छन्दादि पूर्ववद्भवेत् । ब्रह्माण्डगोलकेऽपि या जगतीतले तां सर्वो भुनक्ति । यस्याः स्मरणात् सिद्धो निदेशवर्ती च भवेत् तां न्यसेत् । न्यसनं न्यासः । सम्यक् न्यासः संन्यासः । न तु मुण्डितमुण्डः । तस्य देवादयो नमस्यन्तीति प्रोतं वेद । ॐ शिवम् ॥

इत्याथर्वणे सौभाग्यकाण्डे गुह्यषोढान्यासोपनिषत् समाप्ता
